इयम् आकाशवाणी

संस्कृत-वार्ता:

दिनाङ्क :- 07.06.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी विपद्-प्रतिरोधि-अवसंरचना-विंशतिपञ्चविंशतिः इति विषयिकं अन्ताराष्ट्रिय-सम्मेलनम् संबोधयन् आफ्रिकीय-सङ्घस्य सम्मेलने सम्मिलिते सति प्रसन्नतां प्रकटितवान्।
- विश्वब्याङ्क् इत्यस्य प्रतिवेदनानुसारं भारते गतैकादशवर्षेषु प्रायः सप्तविंशति-कोटिजनाः आत्यन्तिक- दरिद्रतातः मुक्ताः अभवन्निति।
- एनडीए इति प्रशासनस्य एकादशवर्षपूर्तौ प्रधानमन्त्री नरेन्द्रमोदी कृषकाणां कल्याणाय सर्वकारस्य प्रतिबद्धता सुदृढास्तीति प्रतिपादितवान्।
- आगामीनि सप्तदिनानि यावत् पूर्वोत्तरप्रदेशे वर्षायाः प्रवृत्तिः भविष्यतीति ऋतुविज्ञानविभागेन पूर्वानुमानितमस्ति।
- बलिदानस्य पर्व ईद्-उल्-अज़्हा, देशस्य विभिन्नेषु भागेषु धार्मिकोत्साहेन मुस्लिमधर्मावलम्बिभिः आचर्यते।
- नार्वे-चतुरङ्ग-क्रीडायां, विश्वविजेता डी. गुकेशः तृतीयस्थानं, म्याग्नस् कार्ल्सन् इत्यसौ च उपाधिम् अवाप्नोत्।

<u>अथवार्ता: विस्तारेण</u>

पीएम-सीडीआरआई

प्रधानमन्त्री नरेन्द्रमोदी अद्य आफ्रिकासङ्घस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आपदवरोधिमूलसंरचनासम्मेलने भागग्रहणे प्रसन्नतां प्रकटितवान्। सीडीआरआइ इति सङ्घं

आभासीय-माध्यमेन सम्बोधयता प्रधानमन्त्रिणा कार्याचरण-कार्यक्रमाणां परिकल्पना, विकासशील-राष्ट्रेभ्यः वित्तोपलब्धता च भवत्विति सुनिश्चेतुं सबलं स्वविचाराः प्रचटिताः।

श्रीमोदिना आशा प्रकटिता यत् अस्मिन् सम्मेलने चर्चायां विभिन्नेषु विषयेषु विचारः भविष्यतीति । प्रधानमन्त्रिणा मोदिना फ्रांसदेशस्य राष्ट्रपतेः इमैनुएल मैक्रों इत्यस्य समर्थन-प्रदाने, तस्मै धन्यवादाः प्रदत्ताः। एतत् सम्मेलनं प्रथमवारं फ्रान्सदेशे आयोजितम् अस्ति।

<u>प्रधानमन्त्री-कृषकाः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य भारतीय-कृषकाणां कल्याणार्थं सर्वकारस्य प्रतिबद्धता पुनरुद्घाटिता। केन्द्रस्य एन्. डी. ए-सर्वकारस्य एकादशवर्षपूर्तौ, देशस्य परिश्रमि-कृषकाणां सेवा सर्वकारस्य सौभाग्यम् अस्तीति श्रीमोदी अवदत्। तेनोक्तं यत् गतैकादश-वर्षेभ्यः सर्वकारस्य विभिन्नाः उपक्रमाः कृषकाणां समृद्धिं वर्धितवन्तः, कृषिक्षेत्रस्य समग्रपरिवर्तनम् अपि सुनिश्चितं कृतवन्तः इति। सः अवदत् यत् सर्वकारेण मृत्तिका-स्वास्थ्यं, सिञ्चनेत्यादिषु विषयेषु ध्यानं दत्तम् अस्ति, येन कृषकाः अत्यधिकतया लाभान्विताः भवन्तः सन्तीति। श्रीमोदी अपि अवदत् यत् आगामिनि काले कृषकाणां कल्याणार्थं सर्वकारस्य प्रयत्नाः अधिकशक्त्या सञ्चालयिष्यन्ते इति।

<u>विश्वब्याङ्कानुसारं भारतीयानां सम्पत्तिः</u>

एकादश-द्वादशोत्तर-द्विसहस्रतमवर्षतः द्वाविंशति-त्रयोविंशत्युत्तर-द्विसहस्रतम-वर्षपर्यन्तं एकोनसप्तत्युत्तरद्विशतमिलियनमिताः जनाः अतिदरिद्रतायाः उपरि आनीय भारतेन आत्यन्तिका प्रगतिः कृता। विश्वब्याङ्क् इत्यस्य नवीनतम- दत्तांशानुसारं, यत्र आत्यन्तिक- दारिद्र्य एकादश-द्वादशोत्तर-द्विसहस्रतमवर्षे दशमलवैकोत्तर-सप्तविंशतिः प्रतिशतमासीत् तत्रैव द्वाविंशति-त्रयोविंशत्युत्तर-द्विसहस्रतमे वर्षे केवलं दशमलवत्र्यधिक-पञ्चप्रतिशतं यावत् महत्त्वपूर्णरूपेण न्यूनीकृतमस्ति। अस्य अधिकांश-प्रगतिः उत्तरप्रदेशः, महाराष्ट्रः, बिहारः, पश्चिमबङ्गालः, मध्यप्रदेशः इत्यादिषु राज्येषु अभवदिति विश्ववित्तकोषेण सूचितम्।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## बिरला ब्रिक्स्:

लोकसभायाः अध्यक्षः ओम् बिर्ला वर्यः अद्य अवदत् यत्, भारतं सर्वदा विधिप्रशासनस्य, वैश्विकसहयोगस्य, विश्व-मञ्चे संवादस्य च आवश्यकतायाः समर्थनं करोति। ब्रजील्-देशस्य ब्रसीलिया-नगरे आयोजिते एकादशे ब्रिक्स्-संसदीय-सम्मेलने भारतीय-प्रतिनिधिसङ्घस्य नेतृत्वे चलचित्रीय-सन्देशम् प्रसारयन् श्रीबिर्ला-वर्यः सूचितवान् यत्, ब्रिक्स्-राष्ट्राणां मध्ये संसदीय-सहकारं सुदृढं कर्तुं सार्थक-संवादः, विचाराणां आदानप्रदानम्, सहभागि-प्रतिबद्धताञ्च भवेदिति। सः अकथयत् यत् ब्रिक्स्-देशाः पहलगाम्-क्षेत्रे आतङ्काक्रमणस्य निन्दाम् अकुर्वन्, संयुक्तप्रयासमाध्यमैः आतङ्काक्रमणं विरुध्य शून्य-सहिष्णुतायाः नीतिं स्वीकर्तुञ्च अवधानं दत्तवन्तः इति।

## जयशङ्करः

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य भारत-युनैटेड् किङ्गडम् इत्येतयोर्मध्ये सद्यस्सम्पन्नं मुक्तवाणिज्यिकसमन्वयेन सह द्विपक्षय-योगदान-सम्मेलनञ्च महत्त्वपूर्णम् इति अवोचत्। नवदेहल्यां यू. के. विदेशसचिवेन डेविड् लैमी इत्यनेन सह मिलित्वा डा. जयशङ्करः अवदत् यत् एषा सन्धिः न केवलं द्विमार्गीयव्यापारं निवेशञ्च प्रवर्धयिष्यति अपितु उभय-राष्ट्रयोर्मध्ये द्विपाक्षिकसम्बन्धैस्सह अन्येषु सामरिक-पक्षेष्वपि सकारात्मकप्रभावं जनयिष्यतीति। सः अवदत् यत् आपूर्ति-मूल्यशृङ्खलानां सुदृढीकरणेऽपि अस्य योगदानं भविष्यतीति। डॉ. जयशङ्करः पहलगाम् इत्यत्र बर्बरातङ्कक्रमणस्य दृढ-निन्दायै, आतङ्कवादं विरुध्य कृते युद्धे च भारतस्य

समर्थनाय यू. के. सर्वकारं प्रति साधुवादान् प्रेषितवान्। सः अवदत् यत् भारतं आतङ्कवादं विरुध्य शून्य-सहिष्णुतायाः नीतिं आचरति, सहभागिनश्च तदवगच्छन्त्विति अपेक्षते।

## शिवराज सिंह चौहान-यात्रा

केन्द्रीय-कृषि- कृषक- कल्याण मन्त्रिणा शिवराजसिंह चौहानेन उक्तं यत् भारतदेशः विकसितराष्ट्र-निर्माणे कृषि-क्षेत्रीय- परिष्कारपूर्वकं कृषकाणाम् इतोप्यधिकसमृद्ध्यै च निर्भरः अस्ति। सः कृषकान् वैज्ञानिकानाञ्च वचनं श्रुत्वा तेषां परामर्शाणां उपयोगेन स्वकार्यं सुदृढं कर्तुं विकसितकृषि संकल्पाभियानस्य आधिक्येन लाभं ग्रहीतुञ्च प्रोत्साहितवान्। सः अद्य मध्यप्रदेशस्य सीहोरजनपदे एकस्मिन् कार्यक्रमे प्रवदन् आसीत्। आयोजने एकपञ्चाशत् कोटिरूप्यकाणां विकासपरियोजनानां प्रारम्भोऽपि तेन विहितः।

## भारतर्तुविभागः

भारतीय-ऋतुविज्ञान-विभागेन अद्य मध्यप्रदेशे, मराठवाडेति क्षेत्रे, नागालैण्ड्-प्रदेशे, मणिपुरे, मिजोरम्-प्रदेशे, त्रिपुराराज्ये च प्रचण्डवृष्टिः भविष्यतीति पूर्वानुमानं कृतमस्ति। ऋतुविज्ञानविभागानुगुणं, आगामीनि सप्तदिनानि यावत् पूर्वोत्तरक्षेत्रे वृष्टिः निरन्तरतया भवितुमर्हति।

## केन्द्रीय-उपभोक्तृ-संरक्षण-प्राधिकरणस्य परामर्शः

केन्द्रीय-उपभोक्तृ-संरक्षण-प्राधिकरणेन सर्वेभ्यः ई-वाणिज्य-मञ्चेभ्यः परामर्शः प्रसारितोऽस्ति यत् तेषां मञ्चाः कपटानुचित-व्यापार-व्यवहारेषु संलग्नाः न भवेयुरिति सुनिश्चितं कर्तुं आवश्यकोपायाः स्वीकर्तव्याः इति। एकस्मिन् वक्तव्ये उपभोक्तृकार्यमन्त्रालयः अवदत् यत् सर्वे ई-वाणिज्यिक-मञ्चाः त्रिषु मासेषु वाणिज्यिक-व्यवहाराणां कृष्णरूपाणि ज्ञातुं आत्म-परीक्षणाय सूचिताः सन्ति। मन्त्रालयः अवदत् यत् प्राधिकरणं कृष्णरूपाणां निवारणाय नियमनाय च निर्गमितानां मार्गनिदेशानाम् उल्लङ्घनं निकटतया निरीक्षमाणम् अस्तीति।

## ईद-उल-अजहा

बलिदानस्य पर्व ईद्-उल्-अजहा इति देशस्य विभिन्नेषु भागेषु धार्मिकोत्साहेन मुस्लिमधर्मावलम्बिभिः आचर्यते। अवसरेऽस्मिन्

राष्ट्रपतिना, प्रधानमन्त्रिणा, उपराष्ट्रपतिना, च देशवासिभ्य: ईद-उल-अजहा इति पर्वण: शुभकामना: प्रदत्ता:।

<u>चतुरङ्गक्रीडा :</u>

चतुरङ्ग-क्रीडायां विश्वविजेता डी गुकेशः अन्तिमचक्रे अमेरिकादेशीय- क्रीड़कं फबियानो कारुआना इत्यमुं विरुध्य महतीं त्रुटिं कृत्वा तृतीयस्थानं प्राप्तवान्, तत्रैव पञ्चधा विश्वविजेत्रा मैग्नस- कार्ल्सेन् इत्यनेन नॉर्वे-चतुरङ्ग क्रीडायां सप्तमो जयो लब्धः।